"मान्धातेति महीपतिः कृतयुगेऽलङ्कारभूतो गतः
सेतुर्येन महोदधौ विरचितः क्वासौ दशास्यान्तकः ।
अन्ये चापि युधिष्ठिरप्रभृतयो यावद्भवान् भूपते !
नैकेनापि समं गता वसुमती मन्ये त्वया यास्यति ॥"

इति भोजकृतश्लोकं पठित्वा पपात च । ततो राजा पण्डितमानीय मया पुत्त्रो हतः प्रायश्चित्तमुच्यतामित्युवाच । ततस्ते ऊचुः राजन् ! सवासा वह्निमाविश । ततो राज्ञो वह्निप्रवेशे निश्चिते सति तद्वार्त्तां श्रुत्वा नृपद्वारमागत्य वत्सराजो बुद्धिसागरं प्राह तात ! मया भोजो न मारितः बुद्धिसागरश्च तस्य कर्णे किमपि कथयति । ततो वत्सराजो निष्क्रान्तः । ततस्तन्मुहूर्त्तेन साक्षान्महेश्वर इव एकः कापालिक आगतः । तं वीक्ष्य बुद्धिसागरः प्राह योगिन् ! कुत आगम्यते कापालिके त्वयि जगच्चमत्कारी कलाविशेषश्चौषधिविशेषो वा अस्ति । ततो राजाप्याह मया सहसा हतं पुत्त्रं रक्ष । कापालिकः प्राह राजन् ! मा भैषीः पुत्त्रस्ते नाथप्रसादेन न मरिष्यति प्रातस्तव गृहं स्वयमेव समेष्यति परं श्मशानभूमौ बुद्धिसागरमन्त्रिणा सह होमद्रव्यं प्रेषय । कापालिकेन यदुक्तं तत् सर्व्वं राज्ञा सम्पाद्य बुद्धिसागरः प्रेषितः ततश्च रात्रौ गूढ़तया वत्सराजगृहात् भोजस्तत्र नदीपुलिनं नीतः योगिना भोजकुमारो जीवित इति किम्बदन्ती सर्व्वतोऽप्यजायत । ततः पौरामात्यैः परिवृतो भोजो राजभवनमागतः । ततस्तमालिङ्ग्य रुदन्तं मुञ्जं निवार्य्य भोजः स्तौति । ततो राजा लज्जावनतग्रीवः सन् निजसिंहासने भोजमुपवेश्य राज्यं दत्त्वा वनं गतः । ततो मुञ्जे वनं प्राप्ते बुद्धिसागरं मुख्यामात्यं विधाय भोजः स्वयं राज्यसुखं बुभुजे । ततो राजसभायां सहस्रशो बुधवरा दिग्भ्य समागमुः ततो राजा अमात्यमाह ।

"लक्षं महाकवेर्देयं तदर्द्धं विबुधस्य च ।
देयं ग्राम्यकवेर्वत्स ! तस्याप्यर्द्धं त्वयान्वहम् ॥"
इति ॥

ततः क्रमेण वररुचिसुबन्धुबाणामररामदेवहरिवंशशङ्करकलिङ्गकर्पूरविनायकमदनविद्याविनोदकोकिलतारेन्द्रप्रमुखाः सर्व्वशास्त्रविचक्षणाः सर्व्वज्ञा इव राजसभामहर्निशमलंकुर्व्वन्ति । कियत्कालानन्तरं कालिदासकवौ समागते तेन सार्द्धं राज्ञः परमा प्रीतिरजायत । अन्ये विद्वांसः कालिदासं वेश्यालम्पटं विदित्वा सर्व्वभावेन वैरसक्तुः न कश्चित् सभायां स्पृशति न कोऽपि वदति । किन्तु भोजनृपतिस्तेन सार्द्धं परमप्रीतो बभूव । अन्येषां पण्डितानामागमनं तेषां पद्यानि समस्यापूरणानि तेभ्यो बहुलक्षसुद्रादानादिवर्णनञ्च ग्रन्थशेषपर्य्यन्तमस्ति । तद्ग्रन्थविस्तरभयात् न लिखितम् । इति भोजप्रबन्धपुस्तकात् सङ्कलितम् ॥*॥ ऐन्द्रजालिकविद्यां भोजविद्यां वदन्ति ॥

भोजकटः, पुं, भोजदेशः । इति शब्दरत्नावली ॥ ( रुक्मिनिर्म्मिते पुरे, क्ली । यथा, विष्णुपुराणे । ५ । २६ । १३ ।
"इत्युक्तेन परित्यक्तः कृष्णेनाक्लिष्टकर्म्मणा ।
रुक्मी भोजकटं नाम पुरं कृत्वावसत्तदा ॥" )

भोजनं, क्ली, ( भुज् + "ल्युट् च ।" ३ । ३ । ११५ । इति भावे ल्युट् । ) भक्षणम् । कठिनद्रव्यस्य गलाधःकरणम् । तत्पर्य्यायः । जग्धः २ जेमनम् ३ लेपः ४ आहारः ५ निघसः ६ न्यादः ७ । इत्यमरः । २ । ९ । ५५ ॥ जमनम् ८ विघसः ९ । इति तट्टीका ॥ अभ्यवहारः १० प्रत्यवसानम् ११ अशनम् १२ खदनम् १३ निगरः १४ । इति राजनिर्घण्टः ॥ * ॥ अथ भोजनगुणविधानादि ।

"भोजनाग्रे सदा पथ्यं जिह्वाकण्ठविशोधनम् ।
अग्निसन्दीपनं हृद्यं लवणार्द्रकभक्षणम् ॥
आयुष्यते गुड़े रोगा म्रियुर्लीनो विदाहिषु ।
आरोग्यं कटुतिक्तेषु बलं मांसे पयःसु च ॥
अन्नाद्दशगुणं पिष्टं पिष्टाद्दशगुणं पयः ।
पयसोऽष्टगुणं मांसं मांसादष्टगुणं घृतम् ॥
घृतादष्टगुणं तैलं मर्द्दनान्न च भक्षणात् ।
आहारः प्रीणनः सद्यो बलकृद्देहधारणः ॥*॥
आयुष्यं प्राङ्मुखो भुङ्क्ते यशस्यं दक्षिणामुखः ।
श्रियं प्रत्यङ्मुखो भुङ्क्ते ऋतं भुङ्क्ते उदङ्मुखः ॥
कुक्षेरन्नेन भागौ द्वावेकं पानेन पूरयेत् ।
वायोः सञ्चारणार्थञ्च चतुर्थमवशेषयेत् ॥
दन्ते चावगतं चान्नं शौचेनैवाहरेज्जलैः ।
कुर्य्यादनिर्गतं तद्धि मुखस्यानिष्टगन्धताम् ॥
भुक्त्वा पाणितलं घृष्ट्वा चक्षुषोर्यदि दीयते ।
अचिरेणैव तद्वारि तिमिराणि व्यपोहति ॥
भुक्त्वाचम्य करं वामं दत्त्वा कुक्षौ ततः पठेत् ।
भुक्तं महेन्द्रहस्तेन वैश्वानरमुखेन च ॥
गरुड़स्य च कण्ठेन समुद्रस्य च वह्निना ।
वातापिर्भक्षितो येन पीतो येन महोदधिः ॥
यन्मया खादितं पीतं तदगस्त्यो जरिष्यति ।
पठित्वैतत् सुखासीनः क्षणं तिष्ठेदनाकुलः ॥
भुक्त्वा पादशतं गत्वा वामपार्श्वेन संविशेत् ।
एवं ह्यधोगतं चान्नं सुखं तिष्ठति जीर्य्यति ॥
भुक्तोपविशतस्तुन्दं शयानस्य वपुर्भवेत् ।
आयुश्चंक्रममाणस्य मृत्युर्धावति धावतः ॥"
इति राजवल्लभः ॥ * ॥

अपि च ।
"ततो भोजनवेलायां कुर्य्यान्मङ्गलदर्शनम् ।
तस्य प्रदक्षिणं नित्यमायुर्धर्म्मविवर्द्धनम् ॥
लोकेऽस्मिन् मङ्गलान्यष्टौ ब्राह्मणो गौर्हुताशनः ।
हिरण्यं सर्पिरादित्य आपो राजा तथाष्टमः ॥
पादुकारोहणं कुर्य्यात् पूर्व्वं भोजनतः परम् ।
पादरोगहरं वृष्यं चक्षुष्यं चायुषे हितम् ॥*॥
शरीरे जायते नित्यं वाञ्छा नृणां चतुर्विधा ।
बुभुक्षा च पिपासा च सुषुप्सा सुरतस्पृहा ॥
भोजनेच्छाविघातात् स्यादङ्गमर्द्दोऽरुचिः श्रमः ।
तन्द्रा लोचनदौर्ब्बल्यं धातुदाहो बलक्षयः ॥
विघातेन पिपासायाः शोषः कण्ठास्ययोर्भवेत् ।
श्रवणस्यावरोधश्च रक्तशोषो हृदि व्यथा ॥
निद्राविघाततो जृम्भा शिरोलोचनगौरवम् ।
अङ्गमर्द्दस्तथा तन्द्रा स्यादन्नापाक एव च ॥
बुभुक्षितो न योऽश्नाति तस्याहारेन्धनक्षयात् ।
मन्दीभवति कायाग्निर्यथा चाग्निर्निरिन्धनः ॥
आहारं पचति शिखी दोषानानाहारः पचति ।
दोषक्षये च धातून् पचति धातुक्षये प्राणान् ॥
आहारः प्रीणनः सद्यो बलकृद्देहधारणः ।
स्मृत्यायुःशक्तिवर्णौजःसत्त्वशोभाविवर्द्धनः ॥
यथोक्तगुणसम्पन्नमुपसेवेत भोजनम् ।
विचार्य्य दोषकालादीन् कालयोरुभयोरपि ॥"

उभयोः कालयोः प्रातः सायञ्च । तथा च ।
"सायं प्रातर्मनुष्याणामशनं श्रुतिबोधितम् ।
नान्तरा भोजनङ्कुर्य्यादग्निहोत्रसमो विधिः ॥"
प्रातः प्रथमयामात् उपरि द्वितीययामात् अर्व्वाक् । तथा च ।
"याममध्ये न भोक्तव्यं यामयुग्मं न लङ्घयेत् ।
याममध्ये रसोत्पत्तिर्यामयुग्माद्बलक्षयः ॥"
अन्यच्च ।
"क्षुत् सम्भवति पक्वेषु रसदोषमलेषु च ।
काले वा यदि वाकाले सोऽन्नकाल उदाहृतः ॥"
रसादीनां पाकं ज्ञातुमाह ।
"उद्गारशुद्धिरुत्साहो वेगोत्सर्गो यथोचितः ।
लघुता क्षुत्पिपासा च यदा कालः स भोजने ॥"
स्थानमाह ।
"आहारं विजने कुर्य्यान्निर्हारमपि सर्व्वदा ।
उभाभ्यां लक्ष्मुपेतः स्यात् प्रकाशे हीयते श्रिया ॥
निर्हारो मलमूत्रोत्सर्गः । अन्यच्च ।
"आहारनिर्हारविहारयोगाः
सदैव सद्भिर्व्विजने विधेया इति ॥" * ॥
भोजने येषां दृष्टिर्निवारणीया तानाह ।
"हीनदीनक्षुधार्त्तानां पापषण्ढेयरोगिणाम् ।
कुक्कुटादिशुनां दृष्टिर्भोजने नैव शोभना ॥"
येषां दृष्टिः शुभदा तानाह ।
"पितृमातृसुहृद्वैद्यापापकृद्धंसबर्हिणाम् ।
सारसस्य चकोरस्य भोजने दृष्टिरुत्तमा ॥"
कथञ्चित्तद्दुष्टदृष्टिपाते तद्दोषशान्तये ब्रह्मादीन् स्मरेत् । तद्यथा,—
"अन्नं ब्रह्म रसो विष्णुर्भोक्ता देवो महेश्वरः ।
इति सञ्चिन्त्य भुञ्जानो दृष्टिदोषो न बाधते ॥
अञ्जनागर्भसम्भूतं कुमारं ब्रह्मचारिणम् ।
दृष्टिदोषविनाशाय हनूमन्तं स्मराम्यहम् ॥"
भाजनमाह ।
"दोषहृद्दृष्टिदं पथ्यं हैमं भोजनभाजनम् ।
रौप्यं भवति चक्षुष्यं पित्तहृत् कफवातकृत् ॥